International Journal of Sanskrit Research 2023; 9(1): 154-158

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(1): 154-158
© 2023 IJSR
www.anantaajournal.com
Received: 19-11-2022
Accepted: 20-12-2022

**डॉ. स्वपनमालः**

सहायकाध्यापकः, संस्कृतविभागः

रायगञ्जविश्वविद्यालयः,

उत्तरदिनाजपुरम्पश्चिमबङ्गः ,

कोलकाता, भारतम्

**Corresponding Author:**

**डॉ. स्वपनमालः**

सहायकाध्यापकः, संस्कृतविभागः

रायगञ्जविश्वविद्यालयः,

उत्तरदिनाजपुरम् पश्चिमबङ्गः ,

कोलकाता, भारतम्

# कौटिलीयार्थशास्त्रदृष्ट्या पश्चिमबङ्गीय-आउशग्रामस्थितस्य छोडाग्रामस्य जनपदत्वविचारः

**डॉ. स्वपनमालः**

**सारांशः**

सर्वोत्कृष्टे संस्कृतसाहित्ये बहुविधाः ज्ञानविधायकशाखाः विद्यन्ते। तद्यथा – वैदिकसाहित्यम् , अर्वाचीनसाहित्यादिनि। तेषु ,अर्थशास्त्रात्मकसाहित्यम्-स्मृति ,लौकिकसाहित्यम् ,पुराणसाहित्यम् साहित्यविभाजनेषु उल्लेखयोग्यरूपेण महामतिकौटिल्यप्रणीतम् अर्थशास्त्रमन्यतमम्। अर्थशास्त्रमिति ग्रन्थः बहुपूर्वे प्रणीतः सन् साम्प्रतिककालेऽपि अस्यग्रन्थस्य गुरुत्वं सर्वत्रैव स्वीक्रियते। अर्थशास्त्रे प्रतिफलिताः समाजव्यवस्थाराष्ट्रव्यवस्थादयः इदानीन्तनकाले देशे विदेशे च अङ्गीक्रियन्ते। , अमात्यनियोगः इत्यस्मिन् ,प्रजानां कर्तव्यम् ,राष्ट्रशासनपद्धतिः ,अर्थशास्त्रे यथा राष्ट्रनिर्माणपद्धतिः विषये आलोचनमस्ति तथैव प्रजानां कृते तथा चतुराश्रमेषु चतुर्वर्णेष्ववस्थितानां जनानां कृते नूतनं जनपदनिर्माणम्पुरातनजनपदे पुनः जनस्थापनमित्यादिविषये , प्रायोगिकवास्तवोचितभावनात्मकदिशानिर्देशः प्राप्यते। इत्यस्मात् कारणात् पश्चिमबङ्गीयपूर्ववर्धमानमण्डलान्तर्गतस्य आउशग्रामारक्षाञ्चलस्य छोडाग्रामे केन प्रकारेणकथं वा , अर्थशास्त्रानुमोदितः जनपदनिवेशः सम्यक् प्रतिफलितः इति क्षेत्रसमीक्षात्मकविषयो भवत्यस्य शोधपत्रस्य सारः।

**कूट शब्दाः**: अर्थशास्त्रम्मन्दिरम्। ,भूमिव्यवस्था ,छोडाग्रामः ,निवेशः ,पदम् ,जनः ,

प्रस्तावना

संस्कृतसाहित्यस्य अन्यतमं प्रसिद्धं शास्त्रं भवति कौटिल्यप्रणीतं चाणक्यप्रणीतं वा अर्थशास्त्रम्। अर्थशास्त्रस्य सामान्याक्षरिकार्थो भवति अर्थविषयकशास्त्रम्। परन्तु तदर्थः अत्र न गृहीतः। अर्थशास्त्रं अर्थनीतिविद्यातः बहु विस्तृतं गभीरतरञ्च। प्राचीने भारतवर्षे भारतीयाः विश्वसन्ति स्म यत् तेषां जीवने पुरुषार्थचतुष्टयस्य प्रयोजनमासीत् तत्तु इदानीमेव अस्ति। पुरुषार्थः इत्युक्ते पुरुषस्य जीवस्य ,

अर्थः प्रयोजनमिति पुरुषार्थः। पुरुषार्थचतुष्टयं भवति -अर्थ-धर्म -मोक्षाश्च। एतेषु चतुर्विधेषु पुरुषार्थेषु मोक्षः एव परमपुरुषार्थः -काम -अर्थ-इति बहुषु शास्त्रेषु कथितमस्ति। किन्तु मोक्षप्राप्त्यर्थं धर्म कामान्नपि प्रयोजनम्। यतोहि बन्धनमेव मोक्षस्य कारणम्। मोक्षस्य अर्थः मुक्तिः। यदि बन्धनं न भवति चेत् मुक्तिः कुतो भविष्यतीति। प्राचीनाः भारतीयाः स्वीकृतवन्तः यत् धर्मकामनामकौ द्वौ पुरुषार्थौ अर्थस्योपर्यपेक्षितौ। महामतिना कौटिल्येनोक्तम् – अर्थ एव प्रधान इति कौटिल्यःअर्थमूलौ हि , धर्मकामाविति।[1] अतः सर्वाग्रे अर्थस्य प्राधान्यमस्ति, अनन्तरमितरेषाम्। धर्मः कामश्च अर्थेनैव सेवितं भवति। तस्मात् -काम-कारणात् महामतिः कौटिल्यः पार्थिवसमुन्नतिसाधनार्थं धर्म मोक्षाणांसम्यकुपसेवनार्थं मनुष्यणां कल्याणाय अर्थशास्त्रग्रन्थं रचितवान्। तस्मादेव अर्थशास्त्रस्य लक्षणं प्रदत्तमर्थशास्त्रकारेण – पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृतैकमिदमर्थशास्त्रं कृतम्।[2] पुनश्च प्रायेण अर्थशास्त्रस्य अन्तिमे तेनोक्तम् – मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः। तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति।[3]

कौटिल्यकृतस्य अर्थशास्त्रग्रन्थस्य अध्यक्षप्रचारः इत्याख्ये द्वितीये अधिकरणे प्रथमाध्याये जनपदनिवेशमवलम्ब्य विस्तृतमालोचनमस्ति। जनपदनिवेश– शब्दस्यार्थोऽस्ति- जनः इत्यर्थे ब्राह्मण-शूद्रजातीयः तथा च ब्रह्मचर्य-वैश्य-क्षत्रिय-गार्हस्थ-इत्युक्ते -सन्न्यासाश्रमवासिनः जनाः मनुष्या वा। पद-वाणप्रस्थ -निवेशः इत्युक्ते स्थापनम्। अर्थात् जनपदनिवेश ,अवस्थानम् – शब्दस्य संक्षेपार्थो भवति चतुर्वर्णचतुराश्रमवासीनां जनानां -नपदस्य तथा सामाजिकावस्थानमिति। अस्मिन्नध्याये ज नग्रामस्यभारतीयप्राचीस्थापनं तत्र जनानां कृते अनुकुलव्यवस्थाग्रहणञ्च राज्ञः कर्तव्यमासीदिति आलोचितमस्ति।

एवम्प्रकारेण कौटिल्यप्रोक्तजनपदनिवेशधारणानुसारमस्मिन् भारतवर्षे पश्चिमबङ्गीयपूर्ववर्धमानमण्डलान्तर्गत- -आउशग्रामारक्षालयान्तर्गते रामनगरपञ्चायते प्राचीनजनपद छोडाग्रामोऽवस्थितःोऽस्ति। अस्य छोडाग्रामस्य प्राच्यां धनकोडाग्रामःउत्तरस्यां दिशि ,प्रतीच्यां बहु विस्तृतमरण्यम् , दक्षिणे भूयेडाग्रामः। पुनश्च उत्तरस्यां दिशि ,नओयापाडाग्रामः -प्रायेण सार्धैकक्रोशदूरे वर्धमान वीरभूममण्डलसीमानानिर्धारणकारी अजयनदः प्रवहति। दक्षिणेऽपि प्रायेणद्विक्रोशदूरे कुनुरनदः प्रवहति। पूर्वदिशि बहु विस्तृतं कृषिक्षेत्रमस्ति। ग्रामस्य ईशानकोणे अतीव प्राचीनं कालीमन्दिरमस्ति। पश्चिमे शिवमन्दिरम् ,धर्मराजमन्दिरम् , ,गोपालमन्दिरम् ,दक्षिणे दुर्गास्थानम् ,दुर्गामन्दिरञ्च महाप्रभुश्रीच ,मनसामन्दिरम् ,कालीमन्दिरम्ैतन्यमन्दिरम्, मनसामन्दिराणि च ,पूर्वे कालीमन्दिरम् ,सरस्वतीमन्दिरम् – । कथितमस्ति अर्थशास्त्रग्रन्थेविद्यन्ते नदीशैलवनगृष्टिदरीसेतुबन्धशाल्मलीशमीक्षीरवृक्षानन्तेषु स्थापयेत्।[4]

अस्मिन्नेव ग्रामे प्रायेण कौटिल्यकृतअर्थशास्त्रग्रन्थवत् यथा - चतुराश्रमव्यवस्था तथैव चतुर्वर्णव्यवस्था वर्तमानकालेऽपि प्रचलितास्ति। ग्रामस्य प्रतीच्यामेकः सर्वकारीयप्राथमिकविद्यालयःपार्श्वे ,शिशुशिक्षानिकेतनानि , उच्चतरमाध्यमिकविद्यालयो वर्तते। यत्र जीवनस्य प्रथमे स्तरे प्रायेण द्विशताधिकाः बालाः मनोयोगेन अध्ययनेन परवर्तिनि स्तरे उन्नीतं भवन्तीति ब्रह्मचर्याश्रमव्यवस्थायाः एकं प्रसिद्धमुद्धरणं भवति। शास्त्रे उच्यते –

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति।।

---

[1] अर्थशास्त्रम् २/७/१ –

[2] तदेव१/१/१ –

[3] तदेव१/१/१५ –

[4] तदेव१/१/२ –

ब्रह्मचर्याश्रमपालनादनन्तरं ते बालाः गार्हस्थाश्रमं प्रविशन्ति। तस्मात् कारणादस्मिन् ग्रामे प्रायेण पञ्चशताधिकजनाः गार्हस्थधर्मं पालयन्ति। तदनन्तरं त्रिशताधिकजनाः वाणप्रस्थाश्रमं यान्ति। यथा अस्य ग्रामस्य निवासौ रवीन्द्रनाथवाउरीवामाप्रसादवाउरी , इति महोदयौ वाणप्रस्थाश्रमौ गतवन्तौ। अर्थशास्त्रे कथितमस्ति यदि कोऽपि जनः स्त्रीकन्यानां जीवनधारणोपायं न विधाय -पुत्र-वाणप्रस्थं गमिष्यति चेत्तस्य साहसदण्डेन शास्तिविधानं – भविष्यतीति विहितम्। यथोक्तमर्थशास्त्रे पुत्रदारमविधाय प्रव्रजतः पूर्वसाहसदण्डःस्त्रियं च प्र ,व्राजयतः। लुप्तव्यवायः प्रव्रजेदापृच्छ्य धर्मस्थान्। अन्यथा नियम्येत।[5] अनेके च गृहे एव स्थित्वा वाणप्रस्थधर्मं पालयन्ति। अन्तिमे आश्रमे वार्धक्ये अनेके मुनिवृत्तिमादाय तथा माधुकरीवृत्तिमादाय जीवनं धारयन्ति। यथाऽस्य ग्रामस्य हाराधनमालःरवीन्द्रनाथवाद्यकराद ,यः। अस्य सन्न्यासाश्रमस्य प्रवलः समर्थको भवति रवीन्द्रनाथवाद्यकर-हाराधनमालश्च। यतो हि तौ उपार्जितं कर्मफलं कुलकल्याणाय संन्यास्य प्रतिदिनं पदव्रजेन माधुकरीवृत्तिं सम्पादयतः। कदापि ते तत्कर्मफलं न याचन्ति पश्यन्ति च। तद्धेतौ तेषां कष्टार्जिते धनक्षये धनवर्धने च स्पृहा नास्ति। सर्वदा सर्वथा ऋतुषद्के ग्रीष्मे वर्षायां शिशिरे च ग्रामतः ग्रामान्तरे समभावेन हास्यमुखेन स्थितप्रज्ञवतद्योगिवदटन्ति व्रजन्ति वा। यथोक्तं श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन –

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।[6]

अस्मिन् ग्रामे अर्थशास्त्रसम्मता ग्रामनिर्माणपद्धतिः परिलक्ष्यणीया। अत्र शतसंख्यकनिवासीनां मध्ये पञ्चजनाः ब्राह्मणाःअन्ये ,ऊनविंशतिजनाः वैश्याः ,एकजनः क्षत्रियः , पञ्चसप्ततिजनाः शूद्राः। अर्थात् अस्मिन् ग्रामे शूद्रजातीयाःजनाः अधिकांशाः वर्तन्ते यत्तु अर्थशास्त्रानुसारेण प्रायेण निर्धारितमस्ति। तथा च एकशततः पञ्चशतमध्ये एव कुलसंख्या अस्ति। यथोक्तम् अर्थशास्त्रे महामतिना कौटिल्येन – शूद्रकर्षकप्रायं कुलशतावरं पञ्चशतकुलपरं ग्रामं क्रोशद्विक्रोशसीमानमन्योन्यारक्षं निवेशयेत्।[7] प्राचीनकाले राजा ब्राह्मणानां यजनपूजनानां कृते क्षेत्रं -याजन-प्रदत्तवान्। तस्मात् क्षेत्रात् सः कदापि करं राजस्वं च न नीतवान्। – एतस्य क्षेत्रस्य नाम ब्रह्मदेयमिति कथ्यते अर्थशास्त्रे ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो
ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत्। आलोचिते छोडाग्रामेऽपि एतादृशी व्यवस्था दृश्यते। ग्रामस्य प्रतीच्यां धर्मराजस्य तथा शिवस्य मन्दिरं विद्यते। अस्य मन्दिरस्य नित्यपूजार्चनमावर्षं प्रचलति ब्रह्मदेयक्षेत्रतः दैवसम्पत्तितो वा। तथैव दक्षिणस्थस्य गोपालमन्दिरस्य पूजार्चनमपि। कालिदासमालस्य गृहे कालीपूजायामपि एतादृशी व्यवस्था प्रचलति। चट्टोपाध्यायधर्मपण्डिताख्याः ब्राह्मणाः अत्र -चट्टराज-,निवसन्ति। अस्य छोडाग्रामस्य क्षत्रियजनाः केवलं जात्या एव इदानीं तेषां क्षत्रियधर्मो न दृश्यते कालनियमात्परन्तु ते , -व्यवसाकार्ये नियुक्ताः सन्ति। केचिद् वैश्यजनाः सम्प्रति व्यवसा केचिद् कृषिकार्ये लग्नाः सन्तिः। ,वाणिज्ये च नियुक्ताः सन्ति शूद्रजातीयाः जनाः अत्र आश्चर्यान्विताः सन्ति। शूद्रजातिषु मालादयः सन्ति। एते-माजी-आँकुडे-वाग्दी-वाउरी-वाद्यकरजनाः प्रायेण कृषिकार्येण सह तथा केचिज्जनाः स्वयमेव कृषकाः केचिज्जनाः कृषिश्रमिकाश्च। एतेषां कृषिकार्यसंलग्नानां जनानां कृते सर्वकारः समवायकोषागारपक्षतः अर्थप्रदानेन निर्दिष्टराजस्ववर्जनेन धान्यबीजप्रदानेन आवासगृहनिर्माणेन च अनुग्रहं करोति। ततोऽधिकं कदाचित् सर्वकारः गृहपालितपशुप्रदानेन समाजस्य दरिद्राणामनुग्रहं करोति। यथोक्तम् अर्थशास्त्रे – धान्यपशुहिरण्यैश्चैनाननुगृह्णीयात् तान्यनु सुखेन दद्युः।[8] अस्मिन् ग्रामे कृषिकार्यं केवलं वर्षायां सम्यग्

[5] तदेव –२/१/५

[6] श्रीमद्भगवद्गीता -२/५५

[7] अर्थशास्त्रम् –२/१/१

[8] तदेव –२/१/३

भवति। किन्तु यदा वर्षा विलम्बेन आयाति तदा तत्कार्यमायाससाध्यं भवति। तदपि अयं ग्रामः छोटोनागमालभूमेरन्तिमांशः। तस्मादस्य ग्रामस्य भूमिः प्रायेण उच्चतमा। तद्धेतौ अत्र वृष्टेर्जलं चिरं न तिष्ठति। अस्याः समस्यायाः समाधानं कर्तुं सर्वकारपक्षतः दामोदरनदस्योपरि दामोदर-निगमाख्यः एकः जलाधारः निर्मितोऽस्ति। -उपत्यका अनावृष्ट्यवस्ाथायां तज्जलं पयःप्रणालीमाध्यमेन कृषिक्षेत्रं याति, तेन कृषिकार्यञ्च सम्यग् भवतीति धारणापि कौटिल्यकृते अर्थशास्त्रे – कथितास्ति सहोदकमाहार्योदकं वा सेतुं बन्धयेत्। अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणान्युग्रहं कुर्यात्पुण्यस्थानारामाणां च। , सम्भूयसेतुबन्धादपक्रामतः कर्मकरबलीमर्दाः कर्म कुर्युः। व्ययकर्मणि च भागी स्यात्न चांशं लभेत। , मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत्।[9]

जनपदस्य सीमानारक्षार्थं अन्तपालदुर्गं स्थापनीयम्तत्र , अन्तपालनामकाः अध्यक्षाः स्थास्यन्तीति अर्थशास्त्रकारस्य विधानम्ा। इतोऽधिकं दुर्गाणामन्तरालप्रदेशे तथा च जनपदद्वारे सीमानायां च जनजातीनामरण्यचराणां वासव्यवस्था करणीयेत्यपि महामतेः सिद्धान्तः – अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत्। तेषामन्तराणि वागुरिकशवरपुलिन्दचण्डालारण्यचराः रक्षेयुः।[10] एवमेव आलोचिते छोडाग्रामे मुख्यमार्गद्वारे जनजातीनां तथा अरण्यचारीणां सान्तालजातीनां चण्डालानां डोमाख्यपदवीधारीणां वासव्यवस्था अस्ति।

जनपदावस्थितानां मनुष्याणामानुकुल्यार्थं हट्टनिर्माणम्, ,मार्गस्य पार्श्वे वृक्षरोपणम् ,मार्गनिर्माणम् ,आपणस्थापनम् ,तडागस्थापनम् द्रव्यवननिर्माणमित्यादिकं राज्ञः कर्तव्यमासीदिति महामतिना कौटिल्येन कथितम् – आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत्।[11] पुनश्चोक्तमर्थशास्त्रकारेण –

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम्।
देशं परिहरेद्राजा व्यक्रीडाश्च वारयेत्।।
दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम्।
स्तेनव्यालविषग्राहैः व्याधिभिश्च पशुव्रजान्।।
वल्लभैः कार्मिकैः स्तेनैरन्तपालैश्च पीडितम्।
शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथम्।।
एवं द्रव्यद्विपवनं सेतुबन्धमथाकरान्।
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिवर्धयेत्।।[12]

आलच्ये शोधपत्रे उल्लिखिते छोडाग्रामेऽपि दक्षिणदिशि हट्टम्बहु , मार्गस्य ,यानचलनार्थञ्च विस्तृतमार्गः-वाणिज्यार्थं बृहत् ,आपणम् बहुमूल्यं ,तडागपरिमार्जनम् ,पुष्करिणीनिर्माणम् ,पार्श्वे वृक्षरोपणम् व्रजस्थाननिर् ,वृक्षद्रव्यवननिर्माणम्माणमतृणक्षेत्रं तथा , ,आरक्षाव्यवस्थानिर्माणम् ,गोचारणभूमिस्थापनम् ग्राम्यमार्गव्यवस्थापनादिकञ्च दृश्यते।

प्राचीनभारतवर्षे यथा अर्थशास्त्रादिषु ग्रन्थेषु नगरपरिकल्पनं कृतमासीत् तथा जनपदनिवेशविषयेऽपि बहु सुचिन्तितं मतं तत्रैव प्राप्यते। यद्यपि तन्मतमतीव प्राचीनं तथापि इदानीन्तनकालेऽपि तन्मतस्य प्रयोगो सर्वत्रैव दृश्यते। कालप्रवाहेण बहु नूतनं द्रव्यं सम्पति जनपदे प्राप्यते तथापि प्राचीनराष्ट्रव्यवस्थायाः प्राचीननगरपरिकल्पनव्यवस्थायाः तथा च प्राचीनजनपदनिर्माणव्यवस्थायाः सार्वकालिकसमर्थनयोग्यं मतं सम्प्रति ग्रहणयोग्यं भवतिपरवर्तिनि कालेऽपि ग्रहणयोग्यं , भविष्यतीत्यस्य क्षेत्रसमीक्षात्मकस्य शोधपत्रस्य आशयः इति शम्।

9 तदेव –२/१/४

10 तदेव –२/१/२

11 तदेव –२/१/४

12 तदेव –२/१/७

## सन्दर्भ सूची


1. उपनिषद्ग्रन्थावली- )१म ,२य ,३य खण्ड(, स्वामी गम्भीरानन्द (सम्पादक), उद्बोधन कार्यालय ,कलकाता , ३७तम पुनर्मुद्रण ,२०१३
2. भारतकोष )४र्थ खण्ड(, बङ्गीय साहित्य परिषत् ,कलिकाता , प्रकाशकालोऽप्राप्तः
3. कुण्डु ,प्राचीनबङ्गे पौराणिक धर्म ओ देवभावना ,शम्भुनाथ , ,बर्धमान ,बर्धमान विश्वविद्यालय१म प्रकाश ,१९९६
4. घोष ,पुस्तक प्रकाशक ,पश्चिमबङ्गेर संस्कृति ,विनय , ,कलिकाता१म प्रकाश ,१९५०
5. चट्टोपाध्यायएककड ,िबर्धमानजेलार इतिहास ओ , लोकसंस्कृति )१म ,2य खण्ड(, राडिक्याल ,कलकाता ,२००१
6. दाँ .बुक सिण्डिकेट प्रा ,बर्धमान परिक्रमा ,सुधीरचन्द्र , ,कलिकाता ,लिमिटेड१म प्रकाश ,१९९२
7. भट्टाचार्यन्याशानाल बुक ,बांलार लोकसंस्कृति ,आशुतोष , ,नया दिल्ली ,ट्राष्ट१९८६
8. भट्टाचार्यहिन्दुदेर देवदेवी उद्भव ओ ,हंसनारायण , )क्रमविकाश१म(, फार्मा के ,लिमिटेड .प्रा .एम .एल . ,कलिकाता१म प्रकाश ,१९६०
9. भट्टाचार्यहिन्दुदेर देवदेवी उद्भव ओ ,हंसनारायण , )क्रमविकाश३य(, फार्मा के ,लिमिटेड .प्रा .एम .एल . ,कलिकाता२००७
10. भादुरीमन ,अपूर्वरतन ,ंदिरमय भारतसरकार .सि.एम , .लि.एण्ड सन्स प्रा, कलिकाता ,१म संस्करण ,१३६४बङ्गाब्द
11. रायबासन्ती ,लोकदेवता ओ लोकाचार ,कामिनीकुमार , ,कलिकाता ,लाइब्रेरी१म प्रकाश ,१९८०
12. राय ,आदि पर्व)बाङ्गालीर इतिहास ,नीहाररञ्जन ,१म खण्ड(, पश्चिमबङ्ग निरक्षरता दूरीकरण समितिकलिक ,ाता ,१९८०
13. District Statistical Handbook, Purba Bardhaman, Bureau of Applied Economics & Statistics, Department of Planning & Statistics, Government of West Bengal, 2017
14. Manava Dharmasastra, Vishvanath Narayan Mandlik, Ganpat Krishnajis Press, Bombay, Ed. 1886
15. Shrimad-Bhagavad-Geeta, Jeevarama Lallurama, The Gujrati Pronting Press, Bombay, Ed. 1912
16. The Arthasastra of Kautilya, Radhagovinda Basak, Benaras Printers & Pvt. Ltd., Calcutta, Ed. 1970
17. The Nighantu and Nirukta, Lakshman Sarup(Ed.), Motilal Banarsidass, Delhi, 2nd Rpt., 1967
18. Yajnavalkyasmriti, Srisa Chandra Vidyarnava, Panini Office, Allahabad, Ed. 1918
19. http://bardhaman.gov.in/forms/sc.html- Dated 03/02/2023 at 11p.m.
20. http://ceowestbengal.nic.in/PollingStationList?DCID=20&ACID=273- Dated 02/02/2023 at 11.30p.m.
21. https://purbabardhaman.nic.in/- Dated 10/01/2023 at 9a.m.
22. http://wbpar.gov.in/writereaddata/Creation%20of%20Purba%20Bardhaman%20and%20Paschim%20Bardhaman%20Districts_b.pdf – Dated 01/01/2023 at 7a.m.